# shrIrAmAShTakam 4

# श्रीरामाष्टकम् ४

## Document Information

Text title : raamaashhTaka 4 bhaje visheShasundaraM

File name : raamaashhTaka4.itx

Category : aShTaka, raama

Location : doc_raama

Transliterated by : Jonathan Wiener wiener78 at sbcglobal.net

Proofread by : Jonathan Wiener wiener78 at sbcglobal.net, NA

Description-comments : Path Pustakam 1934 Srinagar Kashmir Mercantile Press

Latest update : May 2, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 2, 2021

*sanskritdocuments.org*

# श्रीरामाष्टकम् ४

ॐ श्रीरामचन्द्राय नमः ।

अथ रामाष्टकम् ।

श्रीराम राम रघुनन्दन राम राम
    श्रीराम राम भरताग्रज राम राम ।
श्रीराम राम रणकर्कश राम राम
    श्रीराम राम शरणं भव राम राम ॥ १॥

श्रीराम राम दिविजेश्वर राम राम
    श्रीराम राम मनुजेश्वर राम राम ।
श्रीराम राम जगदीश्वर राम राम
    श्रीराम राम शरणं भव राम राम ॥ २॥

श्रीराम राम विबुधाश्रय राम राम
    श्रीराम राम जगदाश्रय राम राम ।
श्रीराम राम कमलाश्रय राम राम
    श्रीराम राम शरणं भव राम राम ॥ ३॥

श्रीराम राम गुणसागर राम राम
    श्रीराम राम गुणभूषण राम राम ।
श्रीराम राम गुणभाजन राम राम
    श्रीराम राम शरणं भव राम राम ॥ ४॥

श्रीराम राम शुभमङ्गल राम राम
    श्रीराम राम शुभलक्षण राम राम ।
श्रीराम राम शुभदायक राम राम
    श्रीराम राम शरणं भव राम राम ॥ ५॥

श्रीराम राम स्वजनप्रिय राम राम

श्रीराम राम सुमुनिप्रिय राम राम ।
श्रीराम राम सुकविप्रिय राम राम
श्रीराम राम शरणं भव राम राम ॥ ६॥

श्रीराम राम कमलाकर राम राम
श्रीराम राम कमलेक्षण राम राम ।
श्रीराम राम कमलाप्रिय राम राम
श्रीराम राम शरणं भव राम राम ॥ ७॥

श्रीराम राम दनुजान्तक राम राम
श्रीराम राम दुरितान्तक राम राम ।
श्रीराम राम नरकान्तक राम राम
श्रीराम राम शरणं भव राम राम ॥ ८॥

श्रीरामचन्द्रः स पुनातु नित्यं यन्नाममध्येन्द्रमणिं विधाय ।
श्रीचन्द्रमुक्ताफलयोरुमायाश्चकार कण्ठाभरणं गिरीशः ॥ ९॥

श्रीरामचन्द्रचरणौ मनसा स्मरामि
श्रीरामचन्द्रचरणौ वचसा गृणामि ।
श्रीरामचन्द्रचरणौ शिरसा नमामि
श्रीरामचन्द्रचरणौ शरणं प्रपद्ये ॥ १०॥

रामाष्टकमिदं पुण्यं प्रातःकाले तु यः पठेत् ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

इति श्रीरामाष्टकं सम्पूर्णम् ॥

Encoded and proofread by Jonathan Wiener wiener78 at sbcglobal.net

*shrIrAmAShTakam 4*

pdf was typeset on May 2, 2021

Please send corrections to *sanskrit@cheerful.com*